रिपुत्रासकरी रेखा शत्रुसंहारकारिणी । भामिनी च तथा माया स्तम्भिनी मोहिनी शुभा ॥११॥
रागद्वेषकरी रात्री रौरवध्वंसकारिणी । यक्षिणी सिद्धनिवहा सिद्धेशा सिद्धिरूपिणी ॥१२॥
लङ्कापतिध्वंसकरी लङ्केशरिपुवन्दिता । लङ्कानाथकुलहरा महारावणहारिणी ॥१३॥
देवदानव सिद्धौघपूजिता परमेश्वरी । पराऽणुरूपा परमा परतन्त्र - विनाशिनी ॥१४॥
वरदा वरदाऽऽराध्या वरदानपरायाणा । वरदेशप्रिया वीरा वीरभूषणभूषिता ॥१५॥
वसुदा बहुदा वाणी ब्रह्मरूपा वरानना । बलदा पीतवसना पीतभूषण - भूषिता ॥१६॥
पीतपुष्पप्रिया पीतहरा पीतस्वरूपिणी । इति ते कथितं विप्र नाम्नामष्टोत्तरं शतम् ॥१७॥
यः पठेत् पाठयेद् वापि शृणुयाद् वा समाहितः। तस्य शत्रः क्षयं सद्यो याति वै नात्र संशय ॥१८॥

प्रभातकाले प्रयतो मनुष्यः पठेत् सुभक्त्या परिचिन्त्य पीताम् ।
द्रुतं भवेत् तस्य समस्तवृद्धिर्विनाशमायाति च तस्य शत्रुः ॥१९॥

*॥ इति श्रीविष्णुयामले नारदविष्णुसंवादे श्रीबगलाऽष्टोत्तरशतनामस्तोत्रम् सम्पूर्णम् ।*

## ॥ अथ बगलाऽष्टोत्तरशतनाम स्तोत्रम् ॥

शतनाम स्तोत्र से देव कृपा होती है तथा अंगरक्षक के समान कार्य करता है।

ब्रह्मास्त्ररूपिणी देवी माताश्रीबगलामुखी । चिच्छक्तिर्ज्ञानरूपा च ब्रह्मानन्दप्रदायिनी ॥१॥
महाविद्या महालक्ष्मी श्रीमत्त्रिपुरसुन्दरी । भुवनेशी जगन्माता पार्वती सर्वमङ्गला ॥२॥
ललिता भैरवी शान्ता अन्नपूर्णा कुलेश्वरी । वाराही छिन्नमस्ता च तारा काली सरस्वती ॥३॥
जगत्पूज्या महामाया कामेशी भगमालिनी । दक्षपुत्री शिवांकस्था शिवरूपा शिवप्रिया ॥४॥
सर्वसम्पत्करी देवी सर्वलोक वशङ्करी । वेदविद्या महापूज्या भक्ताद्वेषी भयङ्करी ॥५॥
स्तम्भरूपा स्तम्भिनी च दुष्टस्तम्भनकारिणी । भक्तप्रिया महाभोगा श्रीविद्या ललिताम्बिका ॥६॥
मैनापुत्री शिवानन्दा मातङ्गी भुवनेश्वरी । नारसिंही नरेन्द्रा च नृपाराध्या नरोत्तमा ॥७॥
नागिनी नागपुत्री च नगराजसुता उमा । पीताम्बा पीतपुष्पा च पीतवस्त्रप्रिया शुभा ॥८॥
पीतगन्धप्रिया रामा पीतरत्नार्चिता शिवा । अर्द्धचन्द्रधरी देवी गदामुद्गरधारिणी ॥९॥
सावित्री त्रिपदा शुद्धा सद्योराग विवर्धिनी । विष्णुरूपा जगन्मोहा ब्रह्मरूपा हरिप्रिया ॥१०॥
रुद्ररूपा रुद्रशक्तिश्चिन्मयी भक्तवत्सला । लोकमाता शिवा सन्ध्या शिवपूजनतत्परा ॥११॥
धनाध्यक्षा धनेशी च नर्मदा धनदा धना । चण्डदर्पहरी देवी शुम्भासुरनिवर्हिणी ॥१२॥
राजराजेश्वरी देवी महिषासुरमर्दिनी । मधुकैटभहन्त्री च रक्तबीजविनाशिनी ॥१३॥
धूम्राक्षदैत्यहन्त्री च भण्डासुर विनाशिनी । रेणुपुत्री महामाया भ्रामरी भ्रमराम्बिका ॥१४॥
ज्वालामुखी भद्रकाली बगला शत्रुनाशिनी । इन्द्राणी इन्द्रपूज्या च गुहमाता गुणेश्वरी ॥१५॥

वज्रपाशधरा देवी जिह्वामुद्गरधारिणी । भक्तानन्दकरी देवी बगला परमेश्वरी ॥१६॥
अष्टोत्तरशतं नाम्नां बगलायास्तु यःपठेत् । रिपुबाधाविनिर्मुक्तः लक्ष्मीस्थैर्यमवाप्नुयात् ॥१७॥
भूतप्रेतपिशाचाश्च ग्रहपीड़ानिवारणम् । राजानो वशमायांति सर्वैश्वर्यं च विन्दति ॥१८॥
नानाविद्यां च लभते राज्यं प्राप्नोति निश्चितम् । भुक्तिमुक्तिमवाप्नोति साक्षात् शिवसमो भवेत् ॥१९॥

*॥ इति रुद्रयामले सर्वसिद्धिप्रद बगलाऽष्टोत्तरशतनाम स्तोत्रम् ॥*

## ॥ अथ बगला सहस्त्रनाम स्तोत्रम् ॥

सहस्त्रनाम से देव की प्रीति प्राप्त होती है तथा सेना के समान कार्य करता है।

सुरालयप्रधाने तु देवदेवं महेश्वरम् । शैलाधिराजतनया संग्रहे तमुवाच ह ॥१॥

॥ श्रीदेव्युवाच ॥

परमेष्ठिन् परंधाम प्रधान परमेश्वर । नाम्नां सहस्त्रं बगलामुख्याद्या ब्रूहि वल्लभ ॥२॥

॥ ईश्वर उवाच ॥

शृणु देवि! प्रवक्ष्यामि नामधेयसहस्त्रकम् । परब्रह्मास्त्र विद्यायाश्चतुर्वर्गफलप्रदम् ॥३॥
गुह्याद् गुह्यतरं देवि सर्वसिद्धैकवन्दितम् । अतिगुप्ततरं विद्या सर्वतन्त्रेषु गोपिता ॥४॥
विशेषतः कलियुगे महासिद्धयोघदायिनी । गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ॥५॥
अप्रकाश्यमिदं सत्यं स्वयोनिरिव सुब्रते । रोधिनी विघ्नसंघानां मोहिनी सर्वयोषिताम् ॥६॥
स्तम्भिनी राजसैन्यानां वादिनी परवादिनाम् । पुरा चैकार्णवे घोरे काले परमभैरवः ॥७॥
सुन्दरीसहितो देव केशवं क्लेशनाशनः । उरगासनमासीनं योगनिद्रामुपागतम् ॥८॥
निद्राकाले च ते काले मया प्रोक्तः सनातनः । महास्तम्भकरं देवि! स्तोत्रं वा शतनामकम् ॥९॥
सहस्त्रनाम परमं वद देवस्य कस्यचित् ।

॥ श्रीभगवानुवाच ॥

शृणु शङ्कर देवेश परमातिरहस्यकम् ॥१०॥
अजोऽहं यत्प्रसादेन विष्णुः सर्वेश्वरेश्वरः । गोपनीयं प्रयत्नेन प्रकाशात् सिद्धिहानिकृत् ॥११॥

विनियोगः - ॐ अस्य श्रीपीताम्बरीसहस्त्रनामस्तोत्रमन्त्रस्य भगवान् सदाशिव ऋषिः, अनुष्टुप् छन्दः, श्रीजगद्वश्यकरी पीताम्बरी देवता, सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः।

॥ अथ ध्यानम् ॥

पीताम्बरपरीधानां पीनोन्नतपयोधराम् । जटामुकुटशोभाढ्यां पीतभूमिसुखासनाम् ॥१२॥
शत्रोर्जिह्वां मुद्गरं च विभ्रतीं परमां कलाम् । सर्वागमपुराणेषु विख्यातां भुवनत्रये ॥१३॥
सृष्टिस्थिति विनाशानामादिभूतां महेश्वरीम् । गोप्यां सर्वप्रयत्नेन शृणु तां कथयामि ते ॥१४॥
जगद्विध्वंसिनीं देवीमजरामरकारिणीम् । तां नमामि महामायां महदैश्वर्यदायिनीम् ॥१५॥

॥स्तोत्रम्॥

प्रणवं पूर्वमुद्धृत्य स्थिरमायां ततो वदेत् । बगलामुखि सर्वेति दुष्टानां वाचमेव च ॥१६॥
मुखं पदं स्तम्भयेति जिह्वां कीलय बुद्धिमत् । विनाशयेति तारं च स्थिरमायां ततो वदेत् ॥१७॥
वह्निप्रियां ततो मन्त्रश्चतुर्वर्गफलप्रदः । ब्रह्मास्त्रं ब्रह्मविद्या च ब्रह्ममाया सनातनी ॥१८॥
ब्रह्मेशी ब्रह्मकैवल्य बगला ब्रह्मचारिणी । नित्यानन्दा नित्यसिद्धा नित्यरूपा निरामया ॥१९॥
सन्धारिणी महामाया कटाक्षक्षेमकारिणी । कमला विमला नीला रत्नकान्तिर्गुणाश्रिता ॥२०॥
कामप्रिया कामरता कामकामस्वरूपिणी । मङ्गला विजया जाया सर्वमङ्गलकारिणी ॥२१॥
कामिनी कामनी काम्या कामुका कामचारिणी । कामप्रिया कामरता कामा कामस्वरूपिणी ॥२२॥
कामाख्या कामबीजस्था कामपीठनिवासिनी । कामदा कामहा काली कपाली च करालिका ॥२३॥
कंसारि कमला कामा कैलासेश्वरवल्लभा । कात्यायनी केशवा च करुणा कामकेलिभुक् ॥२४॥
क्रिया कीर्तिः कृत्तिका च काशिका मथुरा शिवा । कालाक्षी कालिका काली धवलाननसुन्दरी ॥२५॥
खचरी च खमूर्तिश्च क्षुद्रा क्षुद्रक्षुधा वरा । खड्गहस्ता खड्गरता खड्गिनी खर्परप्रिया ॥२६॥
गङ्गा गौरी गामिनी च गीता गोत्रविवर्धिनी । गोधरा गोकरा गोधा गन्धर्वपुरवासिनी ॥२७॥
गन्धर्वा गन्धर्वकला गोपनी गरुड़ासना । गोविन्दभावा गोविन्दा गान्धारी गन्धमादिनी ॥२८॥
गौराङ्गी गोपिकामूर्तिर्गोपी गोष्ठनिवासिनी । गन्धा गजेन्द्रगा मान्या गदाधरप्रिया ग्रहा ॥२९॥
घोरघोरा घोररूपा घनश्रोणी घनप्रभा । दैत्येन्द्रप्रवला घण्टावादिनी घोरनिस्वना ॥३०॥
डाकिन्युमा उपेन्द्रा च उर्वशी उरगासना । उत्तमा उन्नता उन्ना उत्तमस्थानवासिनी ॥३१॥
चामुण्डा मुण्डिता चण्डी चण्डदर्पहरेति च । उग्रचण्डा चण्डचण्डा चण्डदैत्यविनाशिनी ॥३२॥
चण्डरूपा प्रचण्डा च चण्डा चण्डशरीरिणी । चतुर्भुजा प्रचण्डा च चराचरनिवासिनी ॥३३॥
क्षत्रप्रायश्शिरोवाहा छला छलतरा छली । क्षत्ररूपा क्षत्रधरा क्षत्रियक्षयकारिणी ॥३४॥
जया च जयदुर्गा च जयन्ती जयदा परा । जायिनी जयनी ज्योत्स्ना जटाधरप्रियाऽजिता ॥३५॥
जितेन्द्रिया जितक्रोधा जयमाना जनेश्वरी। जितमृत्युर्जरातीता जाह्नवी जनकात्मजा ॥३६॥
झङ्कारा झञ्झरी झण्टा झङ्कारी झकशोभिनी । झखा झमेशा झङ्कारी योनिकल्याणदायिनी ॥३७॥
झञ्झरा झमुरी झारा झरा झरतरा परा । झञ्झा झमेता झङ्कारी झणा कल्याणदायिनी ॥३८॥
ईमना मानसी चिन्त्या ईमुना शङ्करप्रिया । टङ्कारी टिटिका टीका टङ्किनी चटवर्गगा ॥३९॥
टापा टोपा टटपतिष्टमनी टमनप्रिया । ठकारधारिणी ठीका ठङ्करी ठिकरप्रिया ॥४०॥
ठेकठासा ठकरती ठामिनी ठमनप्रिया । डारहा डाकिनी डारा डामरा डमरप्रिया ॥४१॥
डाकिनी डडयुक्ता च डमरूकरवल्लभा । ढक्का ढक्की ढक्कनादा ढोलशब्दप्रबोधिनी ॥४२॥
ढामिनी ढामनप्रीता ढगतन्त्रप्रकाशिनी । अनेकरूपिणी अम्बा अणिमा सिद्धिदायिनी ॥४३॥

अमन्त्रिणी अणुकरी अणुमद्धानुसंस्थिता । तार तन्त्रवती तन्त्रतत्त्वरूपा तपस्विनी ॥४४॥
तरङ्गिणी तत्त्वपरा तन्त्रिका तन्त्रविग्रहा । तपोरूपा तत्त्वदात्री तपःप्रीति प्रघर्षिणी ॥४५॥
तन्त्रयन्त्रार्चनपरा तलातलनिवासिनी । तल्पदा त्वल्पदा काम्या स्थिरा स्थिरतरा स्थितिः ॥४६॥
स्थाणुप्रिया स्थपरास्थिलता स्थानप्रदायिनी । दिगम्बरा दयारूपा दावाग्निदमनी दमा ॥४७॥
दुर्गा दुर्गपरा देवी दुष्टदैत्यविनाशिनी । दमनप्रमदा दैत्यदया - दानपरायणा ॥४८॥
दुर्गार्तिनाशिनी दान्ता दम्भिनी दम्भवर्जिता । दिगम्बरप्रिया दम्भा दैत्यदम्भविदारिणी ॥४९॥
दमना दशनसौन्दर्या दानवेन्द्रविनाशिनी । दयाधरा च दमनी दर्भपत्र विलासिनी ॥५०॥
धारणी धरणी धात्री धराधरधरप्रिया । धराधरसुता देवी सुधर्मा धर्मचारिणी ॥५१॥
धर्मज्ञा धवला धूला धनदा धनवर्द्धिनी । धीराऽधीरा धीरतरा धीरसिद्धिप्रदायिनी ॥५२॥
धन्वन्तरिधरा धीरा ध्येया ध्यानस्वरूपिणी । नारायणी नारसिंही नित्यानन्दा नरोत्तमा ॥५३॥
नक्ता नक्तवती नित्या नीलजीमूतसन्निभा । नीलाङ्गी नीलवस्त्रा च नीलपर्वतवासिनी ॥५४॥
सुनीलपुष्पखचिता नीलजम्बुसमप्रभा । नित्याख्या षोडशी विद्या नित्या नित्यसुखावहा ॥५५॥
नर्मदा नन्दना नन्दा नन्दानन्दविवर्धिनी । यशोदानन्दतनया नन्दनोद्यानवासिनी ॥५६॥
नागान्तका नागवृद्धा नागपत्नी च नागिनी । नमिताशेषजनता नमस्कारवती नमः ॥५७॥
पीताम्बरा पार्वती च पीताम्बरविभूषिता । पीतमाल्याम्बरधरा पीताभा पिङ्गमूर्धजा ॥५८॥
पीतपुष्पार्चनरता पीतपुष्पसमर्चिता । परप्रभा पितृपतिः परसैन्यविनाशिनी ॥५९॥
परमा परतन्त्रा च परमन्त्रा परापरा । पराविद्या परासिद्धिः परास्थानप्रदायिनी ॥६०॥
पुष्पा पुष्पवती नित्या पुष्पमालाविभूषिता । पुरातना पूर्वपरा परसिद्धिप्रदायिनी ॥६१॥
पीतानितम्बिनी पीता पीनोन्नतपयस्विनी । प्रेमा प्रमध्यमा शेषा पद्मपत्रविलासिनी ॥६२॥
पद्मावती पद्मनेत्रा पद्मा पद्ममुखी परा । पद्मासना पद्मप्रिया पद्मरागस्वरूपिणी ॥६३॥
पावनी पालिका पात्री परदा वरदा शिवा । प्रेतसंस्था परानन्दा परब्रह्मस्वरूपिणी ॥६४॥
जिनेश्वरप्रिया देवी पशुरक्तरतप्रिया । पशुमांसप्रियाऽपर्णा परामृतपरायणा ॥६५॥
पाशिनी पाशिका चापि पशुघ्नी पशुभाषिणी । फुल्लारविन्दवदनी फुल्लोत्पलशरीरिणी ॥६६॥
परानन्दप्रदा वीणा पशुपाशविनाशिनी । फुत्कारा फुत्करा फेणी फुल्लेन्दीवरलोचना ॥६७॥
फट्मन्त्रास्फटिका स्वाहा स्फोटाच फट्स्वरूपिणी । स्फाटिका घुटिकाघोरा स्फाटिकाद्रिस्वरूपिणी ॥६८॥
वराङ्गना वरधरा वाराही वासुकी वरा । विन्दुस्था विन्दुनी वाणी विन्दुचक्रनिवासिनी ॥६९॥
विद्याधरी विशालाक्षी काशीवासिजनप्रिया । वेदविद्या विरूपाक्षी विश्वयुग् बहुरूपिणी ॥७०॥
ब्रह्मशक्तिर्विष्णुशक्तिः पञ्चवक्त्रा शिवप्रिया । वैकुण्ठवासिनी देवी वैकुण्ठपददायिनी ॥७१॥
ब्रह्मरूपा विष्णुरूपा परब्रह्ममहेश्वरी । भवप्रिया भवोद्भावा भवरूपा भवोत्तमा ॥७२॥

भवपारा भवाधारा भाग्यवत्प्रियकारिणी । भद्रा सुभद्रा भवदा शुम्भदैत्यविनाशिनी ॥७३॥
भवानी भैरवी भीमा भद्रकाली सुभद्रिका । भगिनी भगरूपा च भगमाना भगोत्तमा ॥७४॥
भगप्रिया भगवती भगवासा भगाकरा । भगसृष्टा भाग्यवती भगरूपा भगासिनी ॥७५॥
भगलिङ्गप्रिया देवी भगलिङ्गपरायणा । भगलिङ्गस्वरूपा च भगलिङ्गविनोदिनी ॥७६॥
भगलिङ्गरता देवी भगलिङ्गनिवासिनी । भगमाला भगकला भगाधारा भगाम्बरा ॥७७॥
भगवेगा भगाभूषा भगेन्द्रा भाग्यरूपिणी । भगलिङ्गासम्भोगा भगलिङ्गासवावहा ॥७८॥
भगलिङ्गसमाधुर्य्या भगलिङ्गनिवेशिता । भगलिङ्गसुपूजा च भगलिङ्गसमन्विता ॥७९॥
भगलिङ्गविरक्ता च भगलिङ्गसमावृता । माधवी माधवी मान्या मधुरा मधुमानिनी ॥८०॥
मन्दहासा महामाया मोहिनी महदुत्तमा । महामोहा महाविद्या महाघोरा महास्मृतिः ॥८१॥
मनस्विनी मानवती मोदिनी मधुरानना । मेनका मानिनी मान्या मणिरत्नविभूषिता ॥८२॥
मल्लिका मौलिका माला मालाधरमदोत्तमा । मदना सुन्दरी मेधा मधुमत्ता मधुप्रिया ॥८३॥
मत्तहंसा समोन्नासा मत्तसिंहमहासनी । महेन्द्रवल्लभा भीमा मौल्यञ्च मिथुनात्मजा ॥८४॥
महाकाल्या महाकाली मनोबुद्धिर्महोत्कटा । माहेश्वरी महामाया महिषासुरघातिनी ॥८५॥
मधुरा कीर्तिमत्ता च मत्तमातङ्गगामिनी । मदप्रिया मांसरता मत्तयुक् कामकारिणी ॥८६॥
मैथुन्यवल्लभा देवी महानन्दा महोत्सवा । मरीचिर्मा रतिर्माया मनोबुद्धिप्रदायिनी ॥८७॥
मोहा मोक्षा महालक्ष्मीर्महत्पदप्रदायिनी । यमरूपा च यमुना जयन्ती च जयप्रदा ॥८८॥
याम्या यमवती युद्धा यदोः कुलविवर्धिनी । रमा रामा रामपत्नी रत्नमाला रतिप्रिया ॥८९॥
रत्नसिंहासनस्था च रत्नाभरणमण्डिता । रमणी रमणीया च रत्या रसपरायणा ॥९०॥
रतानन्दा रतवती रघूणां कुलवर्धिनी । रमणारिपरिभ्राज्या रैधा राधिकरत्नजा ॥९१॥
रावी रसस्वरूपा च रात्रिराजसुखावहा । ऋतुजदा ऋतुदा ऋद्धा ऋतुरूपा ऋतुप्रिया ॥९२॥
रक्तप्रिया रक्तवती रङ्गिणी रक्तदन्तिका । लक्ष्मीर्लज्जा च लतिका लीलालग्ना नितास्क्षिणी ॥९३॥
लीला लीलावती लोभा हर्षाह्लादनपट्टिका । ब्रह्मस्थिता ब्रह्मरूपा ब्रह्मणा वेदवन्दिता ॥९४॥
ब्रह्मोद्भवा ब्रह्मकला ब्रह्माणी ब्रह्मबोधिनी । वेदाङ्गना वेदरूपा वनिता विनता बसा ॥९५॥
बाला च युवती वृद्धा ब्रह्मकर्मपरायणा । विन्ध्यस्था विन्ध्यवासी च विन्दुयुग् विन्दुभूषणा ॥९६॥
विद्यावती वेदधारी व्यापिका बर्हिणी कला । वामाचारप्रिया वह्निर्वामाचारपरायणा ॥९७॥
वामाचाररता देवी वासुदेवप्रियोत्तमा । बुद्धेन्द्रिया विबुद्धा च वुद्धा चरणमालिनी ॥९८॥
बन्धमोचनकर्त्री च वारुणा वरुणालया । शिवा शिवप्रिया शुद्धा शुद्धाङ्गी शुक्लवर्णिका ॥९९॥
शुक्लपुष्पप्रिया शुक्ला शिवधर्मपरायणा । शुक्लस्था शुक्लिनी शुक्लरूपा शुक्लपशुप्रिया ॥१००॥
शुक्रस्था शुक्रिणी शुक्रा शुकरूपा च शुक्रिका । षणमुखी च षडङ्गा च षट्‌चक्रविनिवासिनी ॥१०१॥

षड्ग्रन्थियुक्ता षोढा च षण्माता च षडात्मिका । षडङ्गयुवती देवी षडङ्गप्रकृतिर्वशी ॥१०२॥
षडानना षडस्त्रा च षष्ठी षष्ठेश्वरी प्रिया । षडङ्गवादा षोडशी च षोढा न्यासस्वरूपिणी ॥१०३॥
षट्चक्रभेदनकरी षट्चक्रस्थस्वरूपिणी । षोडशस्वररूपा च षण्मुखी षड्रदान्विता ॥१०४॥
सनकादिस्वरूपा च शिवधर्मपरायणा । सिद्धा सप्तस्वरी शुद्धा सुरमाता स्वरोत्तमा ॥१०५॥
सिद्धविद्या सिद्धमाता सिद्धासिद्धस्वरूपिणी । हरा हरप्रिया हारा हरिणी हारयुक्तथा ॥१०६॥
हरिरूपा हरिधारा हरिणाक्षी हरिप्रिया । हेतुप्रिया हेतुरता हिताहितस्वरूपिणी ॥१०७॥
क्षमा क्षमावती क्षीता क्षुद्रघण्टाविभूषणा । क्षयङ्करी क्षितीशा च क्षीणमध्यसुशोभना ॥१०८॥
अजाऽनन्ता अपर्णा च अहल्या शेषशायिनी । स्वान्तर्गता च साधूनामन्तरानन्तरूपिणी ॥१०९॥
अरूपा अमला चार्द्धा अनन्तगुणशालिनी । स्वविद्या विद्यका विद्याविद्या चारविन्दलोचना ॥११०॥
अपराजिता जातवेदा अजपा अमरावती । अल्पा स्वल्पा अनल्पाऽऽद्या अणिमासिद्धिदायिनी ॥१११॥
अष्टसिद्धिप्रदा देवी रूपलक्षणसंयुता । अरविन्दमुखी देवी भोगसौख्यप्रदायिनी ॥११२॥
आदिविद्या आदिभूता आदिसिद्धिप्रदायिनी । सीत्काररूपिणी देवी सर्वासनविभूषिता ॥११३॥
इन्द्रप्रिया च इन्द्राणी इन्द्रप्रस्थनिवासिनी । इन्द्राक्षी इन्द्रवज्रा च इन्द्रवद्योक्षिणी तथा ॥११४॥
ईला कामनिवासा च ईश्वरीश्वरवल्लभा । जननी चेश्वरी दीना भेदा चेश्वरकर्मकृत् ॥११५॥
उमा कात्यायनी ऊर्द्धा मीना चोत्तरवासिनी । उमापतिप्रिया देवी शिवा चोङ्काररूपिणी ॥११६॥
उरगेन्द्रशिरोरत्ना उरगोरगवल्लभा । उद्यानवासिनी माला प्रशस्तमणिभूषणा ॥११७॥
ऊर्द्धदन्तोत्तमाङ्गी च उत्तमा चोर्ध्वकेशिनी । उमासिद्धिप्रदा या च उरगासनसंस्थिता ॥११८॥
ऋषिपुत्री ऋषिच्छन्दा ऋद्धिसिद्धि प्रदायिनी । उत्सवोत्सवसीमान्ता कामिका च गुणान्विता ॥११९॥
एला एकारविद्या च एणी विद्याधरा तथा । ॐकार वलयोपेता ॐकारपरमा कला ॥१२०॥
ॐवद वद वाणी च ॐकाराक्षरमण्डिता । ऐन्द्री कुलिशहस्ता च ॐलोकपरवासिनी ॥१२१॥
ॐकारमध्यबीजा च ॐनमो रूपधारिणी । परब्रह्मस्वरूपा च अंशुकांशुकवल्लभा ॥१२२॥
ॐकारा अः फट्मंत्रा च अक्षाक्षरविभूषिता । अमन्त्रा मंत्ररूपा च पदशोभासमन्विता ॥१२३॥
प्रणवोङ्काररूपा च प्रणवोच्चारभाक् पुनः । ह्रींकाररूपा ह्रींकारी वाग्वीजाक्षरभूषणा ॥१२४॥
हृल्लेखा सिद्धियोगा च हृत्पद्मासनसंस्थिता । बीजाख्या नेत्रहृदया ह्रींबीजा भुवनेश्वरी ॥१२५॥
क्लीं कामराजक्लिन्ना च चतुर्वर्गफलप्रदा । क्लींक्लींक्लीं रूपिका देवी क्रीं क्रीं क्रीं नामधारिणी ॥१२६॥
कमला शक्तिबीजा च पाशाङ्कुशविभूषिता । श्रीं श्रींकारा महाविद्या श्रद्धाद्धाश्रवती तथा ॥१२७॥
ॐ ऐं क्लीं ह्रीं श्रीं परा च क्लींकारी परमा कला । ह्रीं क्लीं श्रीङ्कारस्वरूपा सर्वकर्मफलप्रदा ॥१२८॥
सर्वाढ्या सर्वदेवी च सर्वसिद्धिप्रदा तथा । सर्वज्ञा सर्वशक्तिश्च वाग्विभूतिप्रदायिनी ॥१२९॥
सर्वमोक्षप्रदा देवी सर्वभोगप्रदायिनी । गुणेन्द्रवल्लभा वामा सर्वशक्तिप्रदायिनी ॥१३०॥

सर्वानन्दमयी चैव सर्वसिद्धिप्रदायिनी । सर्वचक्रेश्वरी देवी सर्वसिद्धेश्वरी तथा ॥१३१॥
सर्वप्रियङ्करी चैव सर्वसौख्यप्रदायिनी । सर्वानन्दप्रदा देवी ब्रह्मानन्दप्रदायिनी ॥१३२॥
मनोवाञ्छितदात्री च मनोबुद्धि समन्विता । अकारादिक्षकारान्ता दुर्गा दुर्गतिनाशिनी ॥१३३॥
पद्मनेत्रा सुनेत्रा च स्वधा स्वाहा वषट्करी । स्ववर्गा देववर्गा च तवर्गा च समन्विता ॥१३४॥
अन्तस्था वेश्मरूपा च नवदुर्गा नरोत्तमा । तत्त्वसिद्धिप्रदा नीला तथा नीलपताकिनी ॥१३५॥
नित्यरूपा निशाकारी स्तम्भिनी मोहिनी च । वशङ्करी तथोच्चाटी उन्मादी कर्षिणीति च ॥१३६॥
मातङ्गी मधुमत्ता च अणिमा लघिमा तथा । सिद्धा मोक्षप्रदा नित्या नित्यानन्दप्रदायिनी ॥१३७॥
रक्ताङ्गी रक्तनेत्रा च रक्तचन्दनभूषिता । स्वल्पसिद्धिः सुकल्पा च दिव्याचरण शुक्रभा ॥१३८॥
संक्रांतिः सर्वविद्या च सस्यवासरभूषिता । प्रथमा च द्वितीया च तृतीया च चतुर्थिका ॥१३९॥
पञ्चमी चैव षष्ठी च विशुद्धा सप्तमी तथा । अष्टमी नवमी चैव दशम्येकादशी तथा ॥१४०॥
द्वादशी त्रयोदशी च चतुर्दश्यथ पूर्णिमा । अमावस्या तथा पूर्वा उत्तरा परिपूर्णिमा ॥१४१॥
खड्गिनी चक्रिणी घोरा गदिनी शूलिनी तथा । भुशुण्डी चापिनी वाणा सर्वायुधविभीषणा ॥१४२॥
कुलेश्वरी कुलवती कुलाचारपरायणा । कुलकर्म्मसुरक्ता च कुलाचारप्रवर्धिनी ॥१४३॥
कीर्तिः श्रीः चरमा रामा धर्म्मायै सततं नमः । क्षमा धृतिः स्मृतिर्मेधा कल्पवृक्षनिवासिनी ॥१४४॥
उग्रा उग्रप्रभा गौरी वेदविद्या विवर्धिनी । साध्या सिद्धा सुसिद्धा च विप्ररूपा तथैव च ॥१४५॥
काली करुली काल्या च कालदैत्यविनाशिनी । कौलिनी कालिकी चैव कचटतपवर्णिका ॥१४६॥
जयिनी जययुक्ता च जयदा जृम्भिणी तथा । स्राविणी द्राविणी देवी भरुण्डा विन्ध्यवासिनी ॥१४७॥
ज्योतिर्भूता च जयदा ज्वालामालासमाकुला । भिन्ना भिन्नप्रकाशा च विभिन्ना भिन्नरूपिणी ॥१४८॥
अश्विनी भरणी चैव नक्षत्रसम्भवानिला । काश्यपी विनता ख्याता दितिजा दितिरेव च ॥१४९॥
कीर्तिः कामप्रिया देवी कीर्त्या कीर्तिविवर्धिनी । सद्योमांससमालब्धा सद्यश्छिन्नासिशङ्करा ॥१५०॥
दक्षिणा चोत्तरा पूर्वा पश्चिमा दिक् तथैव च । अग्निनैर्ऋति वायव्या ईशान्या दिक् तथा स्मृता ॥१५१॥
ऊर्ध्वाङ्गाऽधोगता श्वेता कृष्णा रक्ता च पीतका । चतुर्वर्गा चतुर्वर्णा चतुर्मात्रामित्मकाक्षरा ॥१५२॥
चतुर्मुखी चतुर्वेदा चतुर्विद्या चतुर्मुखा । वतुर्गणा चतुर्माता चतुर्वर्गफलप्रदा ॥१५३॥
धात्री विधात्री मिथुना नारी नायकवासिनी । सुरा मुदा मुदवती मोदिनी मेनकात्मजा ॥१५४॥
ऊर्ध्वकाली सिद्धिकाली दक्षिणाकालिका शिवा । नील्या सरस्वती सा त्वं बगला छिन्नमस्तका ॥१५५॥
सर्वेश्वरी सिद्धिविद्या परा परमदेवता । हिङ्गुला हिङ्गुलाङ्गी च हिङ्गुलाधरवासिनी ॥१५६॥
हिङ्गुलोत्तमवर्णाभा हिङ्गुलाभरणा च सा । जाग्रती च जगन्माता जगदीश्वरवल्लभा ॥१५७॥
जनार्दनप्रिया देवी जययुक्ता जयप्रदा । जगदानन्दकारी च जगदाह्लादकारिणी ॥१५८॥
ज्ञानदानकरी यज्ञा जानकी जनकप्रिया । जयन्ती जयदा नित्या ज्वलदग्निसमप्रभा ॥१५९॥
विद्याधरा च विम्बोष्ठी कैलासाचलवासिनी । विभवा वडवाग्निश्च अग्निहोत्रफलप्रदा ॥१६०॥

मन्त्ररूपा परा देवी तथैव गुरुरूपिणी । गया गङ्गा गोमती च प्रभासा पुष्करापि च ॥१६१॥
विन्ध्याचलरता देवी विन्ध्याचलनिवासिनी । बहुबहुसुन्दरी च कंसासुरविनासिनी ॥१६२॥
शूलिनी शूलहस्ता च वज्रा वज्रहरापि च । दुर्गा शिवा शान्तिकरी ब्रह्माणी ब्राह्मणप्रिया ॥१६३॥
सर्वलोकप्रणेत्री च सर्वरोगहरापि च । मङ्गला शोभना शुद्धा निष्कला परमाकला ॥१६४॥
विश्वेश्वरी विश्वमाता ललिता हसितानना । सदाशिवा उमा क्षेमा चण्डिका चण्डविक्रमा ॥१६५॥
सर्वदेवमयी देवी सर्वागमभयापहा । ब्रह्मेशविष्णुनमिता सर्वकल्याणकारिणी ॥१६६॥
योगिनी योगमाता च योगीन्द्रहृदयस्थिता । योगिजाया योगवती योगीन्द्रानन्ददायिनी ॥१६७॥
इन्द्रादिनमिता देवी ईश्वरी चेश्वरप्रिया । विशुद्धिदा भयहरा भक्तद्वेषिभयङ्करी ॥१६८॥
भववेषा कामिनी च भरुण्डा भयकारिणी । बलभद्रप्रियाकारा संसारार्णवतारिणी ॥१६९॥
पञ्चभूता सर्वभूता विभूतिर्भूतिधारिणी । सिंहवाहा महामोहा मोहपाशविनाशिनी ॥१७०॥
मन्दुरा मदिरा मुद्रा मुद्रामुद्गरधारिणी । सावित्री च महादेवी परप्रियनिनायिका ॥१७१॥
यमदूती च पिङ्गाक्षी वैष्णवी शङ्करी तथा । चन्द्रप्रिया चन्द्ररता चन्दनारण्यवासिनी ॥१७२॥
चन्दनेन्द्रसमायुक्ता चण्डदैत्यविनाशिनी । सर्वेश्वरी यक्षिणी च किराती राक्षसी तथा ॥१७३॥
महाभोगवती देवी महामोक्षप्रदायिनी । विश्वहन्त्री विश्वरूपा विश्वसंहारकारिणी ॥१७४॥
धात्री च सर्वलोकानां हितकारणकामिनी । कमला सूक्ष्मदा देवी धात्री हरविनाशिनी ॥१७५॥
सुरेन्द्रपूजिता सिद्धा महातेजोवतीति च । परा रूपवती देवी त्रैलोक्याकर्षकारिणी ॥१७६॥
इति ते कथितं देवि पीतानामसहस्रकम् । पठेद् वा पाठयेद् वापि सर्वसिद्धिर्भवेत् प्रिये ॥१७७॥
इति मे विष्णुना प्रोक्तं महास्तम्भकरं परम् । प्रातःकाले च मध्याह्ने सन्ध्याकाले च पार्वती ॥१७८॥
एकचित्तः पठेदेतत् सर्वसिद्धिर्भविष्यति । एकवारं पठेद् यस्तु सर्वपापक्षयो भवेत् ॥१७९॥
द्विवारं च पठेद् यस्तु विघ्नेश्वर समोभवेत् । त्रिवारं पठनाद् देवि सर्वं सिध्यति सर्वथा ॥१८०॥
स्तवस्यास्य प्रभावेण साक्षाद्भवति सुब्रते । मोक्षार्थी लभते मोक्षं धनार्थी लभते धनम् ॥१८१॥
विद्यार्थी लभते विद्यां तर्कव्याकरणान्विताम् । महित्वं वत्सरान्ताच्च शत्रुहानिः प्रजायते ॥१८२॥
क्षोणीपतिर्वशस्तस्य स्मरणे सदृशो भवेत् । यः पठेत् सर्वदा भक्त्या श्रेयस्तु भवति प्रिये ॥१८३॥
गणाध्यक्षप्रतिनिधिः कविकाव्यपरो वरः । गोपनीयं प्रयत्नेन जननीजारवत् सदा ॥१८४॥
हेतुयुक्तो भवेन्नित्यं शक्तियुक्तः सदा भवेत् । यः इदं पठते नित्यं शिवेन सदृशौ भवेत् ॥१८५॥
जीवन् धर्मार्थभोगी स्यान् मृतो मोक्षपतिर्भवेत् । सत्यं सत्यं महादेवि सत्यं सत्यं न संशयः ॥१८६॥
स्तवस्यास्य प्रभावेण देवेन सह मोदते । सुचित्ताश्च सुराः सर्वे स्तवराजस्य कीर्तनात् ॥१८७॥
पीताम्बरपरीधानां पीतगन्धानुलेपनाम् । परमोदयकीर्तिः स्यात् स्मरतः सुरसुन्दरि ॥१८८॥

*॥ इतिश्रीउत्कटशम्बरे नागेन्द्रप्रयाणतन्त्रे षोडशसहस्रे। विष्णुशङ्करसंवादे श्रीपीताम्बरीसहस्रनामस्तोत्रम् ॥११॥*